


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2021; 3(4): 258-262
Received: 13-09-2021
Accepted: 15-10-2021

**डॉ॰ सूर्य मोहन कुमार**
पुस्तकालय सहाकय,
शिक्षाशास्त्र विभाग,
का॰सि॰द॰सं॰वि॰वि॰,
दरभंगा, बिहार, भारत

Corresponding Author:
**डॉ॰ सूर्य मोहन कुमार**
पुस्तकालय सहाकय,
शिक्षाशास्त्र विभाग,
का॰सि॰द॰सं॰वि॰वि॰,
दरभंगा, बिहार, भारत

# मालतीमाधवम् महावीर चरितम् उत्तररामचरिते निरूपितानि

## डॉ॰ सूर्य मोहन कुमार

### सारांश
भवभूति संस्कृतनाटककर्तृषु कविषु अतीव प्रसिद्धः। बहूना संस्कृतकवीनां यथा तथैव भवभूतिरपि जीवनचरितम् नातीव जायते। अयम् स्वकृतौ महावीरचरिते नाटके स्वस्य विषये किञ्चिदिव विवृणोति यथा-तत्र केचित् तैत्तरीयिणः काश्यपाश्चरणगुरवः पंडितपावनः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो ब्रह्मवादिनः इति। तत्र स्वपरिचयं वदता भवभूतिना भट्टगोपालस्य पौत्रः पवित्रकीर्तेः नीलकण्ठस्य आत्मसम्भवः श्रीकण्ठपदलाञ्छनो जातुकर्णीपुत्रः इति अभिहितम्। भवभूतिः प्रथमं नाम "श्रीकण्ठ" इति श्री एम् आर तेलङ्गमहाशयः स्वग्रन्थे मालतीमाधवस्य संस्कृतभाषाकथानुवादे लिखितवान्। अयं भवभूतिनामा कविः वेदान्तशास्त्रे, न्यायशास्त्रे, व्याकरणशास्त्रे ब्रह्मविद्यायां च निष्णातः आसीत् इति अस्य कवेः कृतिभि ज्ञायते। एष काश्यपगोत्रजः। आपस्तम्बसूत्रस्य उदुम्बरब्राह्मणशाखायाम् जनिम् अलभत। अस्य माता जातुकर्णी। पिता नीलकण्ठः। पितामहः भट्टगोपाल। जाननिधि भवभूते गुरु। एष दाक्षिणात्य। विदर्भदेशे विद्यमानं पद्मपुरम् अस्य जन्मभूमिः इतिमात्रम् ज्ञातुं शक्यते। विद्वांसः श्रीतेलङ्गमहोदयाः वदन्ति।

**कूटशब्दः** तेलङ्गमहाशयः, जीवनचरितम्, जन्मभूमिः, नीलकण्ठः।

### प्रस्तावना
"अस्ति दक्षिणापथे पद्मपुरम् नाम नगरम्। तत्र तत्र केचित्तैत्तरीयाः काश्यपा उदुम्बरोपाभिधाना ब्रह्मवादिनो द्विजा वसन्ति स्म। तेषां वंशे महाकविर्नाम कश्चिद्वाजपेययाजी विप्रो बभूवः। अस्मात् पञ्चमः पुरुषोभवभूतिः। अधीतवानयं तर्कव्याकरण-पूर्वोत्तरमीमांसादीनि शास्त्राणि। अस्य पितृकृतं म श्रीकण्ठ इति।" अपि च सः भवभूतिरिति नाम्नः कारणं निरुपयति यथा-

तपस्वी का गतोऽवस्थाम् इति स्मेराननाविव।
गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ॥

तथा च

साम्बा पुनातु भवभूतिपवित्रमूर्तिः इति परशिवम् अस्तौत् इति तस्यैव भवभूतिरिति नामान्तर जातम्" इति। एष स्वस्य शाखाया आपस्तम्बशाखाया एतदहर्विजानीयाद अहर्भार्यामावहते। त्रिरात्रमुभयोरधश्शय्या ब्रह्मचर्य क्षारलवणवर्जनं च। एतद् वाक्यं "मालतीमाधवे" नाटके उल्लिखति। एतेन कवेः स्वाभिमानिता द्योतते।

भवभूति कुमारिलभट्टस्य शिष्य इति पण्डिताः त्रिपाठीमहोदयाः स्वस्य "कविताकौमुदी इति पुस्तकें व्यलिखन्। कुमारिल भट्टाश्च क्रि श में शतमाने आसन्। अतः भवभूते कालः अष्टमशतकम्। तथा च कन्याकुब्जे श्रीहर्षवर्धनात् (द्वितीयशिादित्यात्) अनन्तरम् राजसु मुख्य "यशोवर्मा" एषः क्रि. श. 693 तः 729 पर्यन्तम् राज्यभारम् अकरोत्। यशोवर्मा क्रि. श. 730 तमे वर्षे चीनदेश प्रति राजप्रतिनिधि प्रेषितवान् आसीत्। ततः दशवर्षानन्तरम् काश्मीरराजात् ललितादित्यमुक्तापीडात् पराजितः। अयं यशोवर्मा एव भवभूतेः आश्रयदाता आसीत्। इममेव विषयं "राजतरङ्गीण्याः" एतेन श्लोकेन अवगन्तुम् शक्यते। यथा-

कविवाक्पतिराजश्रीभवभूत्यादिसेवितः।
तिलो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्॥

यशोवर्मणः पराजयानन्तरं "भवभूति" काश्मीरराजम् ललितादित्यम् आश्रतवान्। एतैः कारणै भवभूतेः काल: अष्टमशतमानस्य पूर्वार्धम् इति निश्चेतुं सुलभम्।

संस्कृतसाहित्ये बहवः सन्ति नाटकरचयितारः। तेषु दिगन्तव्याप्तैः यशोभि विलिसितौ कविवरौ द्वौ स्तः- कालिदासः भवभूतिश्च। कनिष्ठिकाः ऽधिष्ठितकालिदासा" उत्तरे रामचरिते भवभूतिर्विशिष्यते" इति वचने इममेताभिप्रायं समर्थयतः। समर्थयतः। अत्र महाकवेः भवभूतेः जीवितविशेषान काश्चनं संस्मरामः। सः श्रीकान्तनीलकण्ठ इति उदाहृतः। तस्य पिता नीलकण्ठः माता जातुकर्णी गुरू: जाननिधिः च आसन्। सः कल्प्या वसन नाटकानि अलिखत्। सः कन्याकुब्जस्य राज्ञः यशोवर्मणः यशोवर्मणः सभायाम् आसीत्। भवभूतिरिति नाम तस्य शिवभक्तिं सूचयति। अस्य 'उम्बेकः' इति नामान्तरमप्यस्ति। अस्य पोषक : यशोवर्मा यद काश्मीरराजेन ललितादित्येन पराजितोऽभूत, तदारभ्य असौ महाकविः बहूनि कष्टान्यनुभूतवान्।

महाकवेरस्य नाटककलायां विशेषासक्तिरासीत्। सैव अस्य नाटकरचनायां प्रधानं कारणमित्यूहयते। कविवरेणानेन त्रीणि रूपकाणि विरचितानि- महावीरचरितम्, मालतीमाधव, उत्तररामचरितं चेति। तेषु क्रमशः वीरशृङ्गारकरुणरसाः प्राधान्यं वहन्ति। वश्यवाक्यं कवेर्वाक्यम् इति महावीरचरिते अनेनैव उक्तत्वात् "वश्यवाक् कविरिति अस्य बिरूदम् भवति। व्याकरणन्यायमीमांसादिषु शास्त्रेषु परिणत इति हेतो 'पदवाक्यप्रमाणज्ञ' इति चतुश्शास्त्राभिजत्वात् "भट्ट" इति नामभिः भवभूतिम् आह्वयन्ति। महाव्याख्यानकर्ता "जगद्धरः" श्रीकण्ठ् इति भवभूते पाण्डित्येन प्राप्तम् बिरुदम् इति स्पष्टतया वदति।

चतुशशास्त्रपारङ्गतस्य भवभूतेः मनसि स्त्रीषु महानादरः। तेषु दिवसेष्वेव अयं महाकविः स्त्रीशिक्षां प्रोत्सहते स्म। अयं विषयः तस्य रचनासु दृश्यते। यथा-

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः॥

अस्य करुणरसपप्रधानम् उत्तररामचरितनाटकं न केवलं भारते किन्तु प्रपञ्चेऽस्मिन् विशिष्ट स्थानमलभत। शाकुन्तलनाटकेन कालिदास इव उत्तररामचरितनाटकेन भवभूति जगत्प्रसिद्धः अभवत्। अत एवोक्तम्। उत्तरे रामचरिते भवभूतिर्विशिष्यते इति।

भवभूतिरुत्तररामचरिते रामुखेन प्रथमवेदं प्रतिज्ञाव्रतवाक्यमुद्भाव-यति। यथा-

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि !

आराधनाय लोकस्य मुञ्चतो नास्ति मे व्याथा !!

उत्तररामचरित आरम्भ एव सूत्रधारस्येयं चिन्ता 'यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्यात्' भवभूतेरेव काचिदात्मव्यथा। किन्तु न कश्चिदपि निरोद्धाऽऽसीत्तस्याः किंवदन्त्यास्तस्मिन् काले। दुर्मुखमात्पौरजनेषु व्याप्तं सीताविषयकमपदवादं श्रुत्वा रामो गर्भभरालसां सीतां लोकाराधनाय तत्याज। सीतां प्रति रामस्य हृदये कीदृशी पवित्रनिष्ठा जागर्ति स्म साऽत्रालोकयितुं शक्यते रामोक्तौ। यथा-

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे।

सामग्रेऽपि उत्तररामचरिते रामस्य सीतावियोगजन्यः करुणरसः पुटपाकप्रतीकाशतां गतः। रामस्तान् दुर्जनान् पौरजानपदान् भगवत्सम्बोधनेन सम्बोध्य रोदिति दुर्वचनात् सीता निर्वासिता। यथा-हे भगवन्तः पौरजानपदाः।

न किल भवतां देव्याः स्थानं गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता !
चिरपरिचितास्ते ते भावास्तथा द्रवयन्ति मा-
मिदमशरणैरद्यास्माभिः प्रसीदत रुद्यते॥

वस्तुतः भवभूतेरुत्तररामचरिते नैकानि मनोवैज्ञानिकानि परिवर्तनानि प्रतीयन्ते, रामभद्रस्य पञ्चवटीप्रस्थानकाले छायासीतायाः परिकल्पना कीदृशी नाट्यार्थोपयोगिनी सहृदयश्लाघ्येति विचारणाविषयः। सीतारामयोश्चिरं सहवासस्य साक्षिणी पञ्चवटी पुनरपि स्वीये क्रोडे समागतं रामं तद्हृदयफलके प्रतिक्षणमङ्कितां सीतां सर्वास्वपि दिक्ष्वभिभासमानां कथं न दर्शयतु। सीताया इयं मनोवैज्ञानिकी छाया भवभूतिकल्पनया चेतनातां बिभ्रती, स्वनेत्रयोः समक्षं रामं परित्यागदुःखाधिकतरं कृशं सन्तप्तं चालोकयन्ती रामं प्रति हृद्यङ्करितं क्षोभशल्यं स्वयमेवोत्पाटयति। स्वनाटकस्य सप्तमेऽङ्के तु भवभूतिर्नाटक एव नाटकमञ्चनविषयिण्या कलात्मिकया तूलिकया सर्वानपि पौरजानपदान सीतारायोर्निसर्गधवलं चरित्रदर्शनं प्रदर्श्य अरुन्धत्या माध्यमेन सीतां रामभद्राय समर्प्य तयोः पुनर्मेलनं कारयित्वा रामायणस्य दुःखमन्तं सुखदं विधायैव विरमति। भवभूतिकृतस्यैतस्य कथापरिवर्तनस्य को हेतुः? किं भवभूतिकालं यावत् रामकथायां सीतारमयोः पुनर्नमिलनं भवभूतिं परिदेवयति स्म? सीतां विना रामव्यक्तित्वस्य पूर्वग्रन्थेषु सन्तुलिता स्थितिस्तमुद्वेजयति स्म। अथवा द्वयोर्व्यक्तित्वं प्रति उत्थानं लब्धमाना निषेधात्मकं रूपं गृह्णन्त्योऽङ्गुलयो भवभूतिं पीडयन्ति स्म। अतएव भवभूतिनिरूपिते रामचरिते सीतारामयोर्द्वव्यक्तित्वयोरुदात्तप्रतिष्ठायां न कश्चिदपि सन्देहावकाशः।

वस्तुतः सीतया सह रामचन्द्रस्य राजीवनमेव रामचन्द्रस्योत्तरचरितस्य प्रमुखतमो विषयः, यतो हि सीतारामयोश्चिरं सहनिवास एव रामायणादारभ्योत्तरवर्तिसंस्कृतसाहित्येषु विसङ्गतीनां परम्परा प्रायशः प्रतिभासते। इदमेव कारणं यदुत्तररामचरितस्यैतस्यैव प्रमुखतमस्य पक्षस्य किञ्चिदवेक्षणमत्र केषुचिद् ग्रन्थरत्नेषु विहितम्। उपर्युक्तयोः सीताचरितजानकी जीवनयोर्महाकाव्ययोः सीताचरित्रचमत्कृतिसङ्कल्पशीलत्वात् तस्यैव शीर्षकस्य प्रतिपाद्यमूलत्वात् सीताया एव व्यक्तित्वस्य पूर्णप्रतिष्ठायां धृतव्रतौ कवी अवलोक्येते। सीताचरितं सीता यदि स्वयं वनं यातु निश्चिनोति लोकापवाददुःखोद्विग्नतया, तथा च यात्यपि स्वस्वामिनो राघवस्य चरणधूलिमभिलषन्ती लक्ष्मणेन सह यत्र तत्रैव जानकीजीवने सभायां राजगृहे लोकापवादमूलभूतचरित्रशङ्कायाः वशिष्टकृपया सर्वथा निर्मूलनादनन्तरं वाल्मीकिपार्श्वमध्ययनार्थं गच्छतोः स्वपुत्रयोः कुशलवयोः शुश्रूषायै सीता स्वेच्छया वाल्मीकिमुनेराश्रमं याति। विचित्रा इमाः

कथावीथयः। अहो रामायणादारभ्य जानकीजीवनपर्यन्तं रामचन्द्रस्योत्तरचरिते विभिन्नतागर्भाणां घटनानामयं चयः किं व्यनक्ति ? कां शिक्षां प्रदातुं प्रयतते ? कमादर्श विवृणोतीति सहृदयानां चिन्तनस्य महिष्ठो विषयः। क्वचिल्लङ्काकाण्डपर्यन्तमेव रामायणम्, क्वचिदुत्तरकाण्डपर्यन्तं रामायणम्, प्रक्षिप्तमुत्तरकाण्डम्, क्वचित्सामान्यलोकापवादचर्चा क्वचिच्च सीताया रामादेशेन निर्वासनम्, क्वचिच्च तस्याः स्वयमेव वनगमनम्, क्वचिदेतस्य लोकापवादस्य कौशल एवं समाधानम्, सर्वथा निर्मूलनमिति नैकाः प्रतीतयः प्रकृतयः परिष्कृतयश्चात्राभिभासन्तेतराम्। यदि जानकीजीवनकारोऽभिराजराजेन्द्रमिश्र उत्तरकाण्डं प्रक्षिप्तं मन्यते तु स कथं रजकनिन्दाविषयकान् प्रकरणविशेषान् स्वकीये महाकाव्ये समुपस्थापयति। यद्युत्तरकाण्डं प्रक्षिप्तमपि न मानयति तु कथं सीता निर्वासनविषयकं सन्दर्भ सर्वथा परिसमाप्य लोकापवादप्रतिनिधिभूतं रजकं क्षमां याचमानं निरूपयति। भवभूतिर्निर्वासितामपि जानकीं पृथ्व्यां प्रविष्टामपि जानकीं येन केन प्रकारेण रामेण सह मेलयति। किं सीतां परित्यज्य रामस्य व्यक्तित्वं लघुतां याति वा तद्राजव्यक्तित्वं प्रभापन्नं भवति? किं निर्वासनानन्तरं स्वतपःशीलत्यागसमुदाचार-ज्योतिषा-सर्वाण्यपि सीता रामायणपात्राणि नैवातिक्रामति। अरे! सीतानिर्वासनघटना सीतां दोषरहितां विज्ञायापि, निर्वासिताया अपि सीताया राघवं प्रति सत्यनिष्ठा श्रद्धा जन्मान्तरेष्वपि तस्यैव पत्नीत्वेच्छा, प्रकृते वनवासे स्वकीयानामेव जन्मान्तरपातकानां विपाकानुभूतिः द्वयोरात्यन्तिकी विकलाश्रुकथा, न पुनर्मिलनं भौतिके जगति, यथा इमा जीवनमूर्च्छना अमरतां ददते रामकथायै, न तथैतद्व्यतिरिक्ता कथोद्धाताः। यतो हि निसर्गजातमेव चरित्रविश्लेषणं नैसर्गिक रामणीयकं चित्ताकर्षणं सूते। तथापीयं रामोत्तरचरित्रस्य शुभा वैविध्यमयी काव्याभा, रामकथायाः काचिदनन्तता। यथा-

आनन्दवर्धनकृते ध्वन्यालोके विलिखतम्-
वाल्कीकिव्यतिरिक्तस्य यद्येकस्यापि कस्यचित्।
इष्यते प्रतिभाऽर्थेषु तत्तदानन्त्यमक्षयम् ॥

वस्तुत इदं सर्वमपि अनन्तार्थसंवलितं आस्तिकं रामकथासाहित्यजातं कवीनां भिन्नभिन्नरूपाणामन्त:करणानां सीतारामचरणयोः वागर्थप्रस्तुतिः। वागर्थानामनन्तताऽपि सर्वथाऽनन्ते श्रीरामचरित एव शोभते। कस्यचनापि श्रद्धालुकवेर्भिन्नत्वे न कश्चिदपि दुराग्रहः, सर्वत्र सदाग्रह: अतो हि तत्र सर्वत्र रसपरिग्रहः। प्रतिक्षणं नवनवानामर्थवैभवानामावाहनम्। सर्वविद्यां नूनां विच्छितिमामन्त्रयन्ती-यमन्तता सत्यं शिवं सुन्दरं दधतीह लोके भावानामानन्त्यं सृजतु सर्वदेति शम्।

तमांसि ध्वंसन्ते परिणमति भूयानुपशमः
सकृत्संवादेऽपि प्रथत इह चामुत्र च शुभम्।
अथ प्रत्यासङ्गः कमपि महिमानं वितरति
प्रसन्नानां वाचः फलमपरिमेयं प्रसुवते॥

एतादृशानां महात्मनां प्रमानिशयोऽयं यदेभिः सह संवादेऽज्ञानं विनश्यति, चित्ते शान्तिः पदं कुरुते, ऐहलौकिकं पारलौकिकं च सुखं समुत्पद्यतेऽथ दैववशादेकत्र वासस्य सौभाग्ये समासादिते कोऽपि प्रभावातिशयो लभ्यते, प्रसादपात्रतोपलब्धौ तु परिच्छेदपथातीतसुखसमृद्धिः समवाप्यत इति धन्या एतादृशो महात्मान इति।

यान्मैत्रावरुणिः प्रशास्ति भगवानाम्नायपूते विधौ
शश्वद्येषु विशामनन्यविषयो रक्षाधिकारः स्थितः।
सावित्रस्य मनोर्महीयसि कुले तेषामवाप्तात्मनां
राज्ञां वो महिमा न जातु वचनप्रज्ञानयोर्गोचरः॥

वसिष्टेन पौरोहित्यमनुष्ठाय नित्यानुगृहीत इत्याशयः। अन्यो युष्मदतिरिक्तः विषयः आश्रयः

यस्य स तथोक्तः अन्यविषयः स न भवतीत्यनन्यविषयः राजान्तरानाश्रित इति तात्पर्यम्। विशाम् मनुष्याणाम् पालने अधिकारः येषु युष्मासु शश्वत् स्थितः नित्यम् वर्त्तते।

गभीरो माहात्म्यात्प्रशमशुचिरत्यन्तसुजनः
प्रसन्नः पुण्यानां प्रचय इव सर्वस्य सुखदः।
प्रभुत्वस्योत्कर्षात्परिणतिविशुद्धद्वेश्च तपसा
मसो दृष्टः सत्त्वं प्रबलयति पापं च नुदति॥

परशुरामस्य दर्शनं ज्ञानवर्धकं पापहरश्च यतोऽसौ महात्मतयाऽतिगभीरः, शान्त्युपासनयाऽतिशुद्धिः आनृशंस्येनातिसुजनः सदा प्रसन्न मूर्ती धर्म इव सर्वहितैषी। प्रभावातिशयवशान् पसश्चातिशयात् कस्यापि द्रष्टव्यः सोऽतोऽस्माभिरपि स्वकार्यानुरोधेन द्रष्टव्योऽसाविति भावः। 'सत्त्वं प्रबलयती' त्युक्तौ 'महान्प्रभुवै पुरुषः सत्त्वस्यैष प्रवर्त्तकः'।

अनुभावयति ब्रह्मानन्द साक्षार्तिक्रयामिव।
स्पर्शस्तेऽद्य वराम्भोजप्रस्फुरन्नालकर्कशः॥

अद्य वरम् उत्तरम् अम्भोजम् तस्य प्रस्फरत् विकसत् यत् नालम् दण्डः तद्वत् कर्कशः कठोरः ते तव स्पर्शः शरीरालिङ्गनम् ब्रह्मानन्दसाक्षार्तिक्रियाम् ब्रह्मानन्दमिव अनुभावयति प्रत्यक्षीकारयति। यथा ब्रह्मानन्दस्तथा त्वदालिङ्गनजन्मा प्रमोद इत्यर्थः। भरतशरीरस्यानन्द-जरोमाञ्चावृततया सकण्टककमल नालोपमेति बोध्यम्।

## संदर्भ


1. नंगलीसजातके कोसियजातके च ।
2. वाटर्स- हेनसांग द्वितीयभागस्य पृ० 1881
3. राज० 29; 8.1001 मन्दिरेषु मूर्तयो भवन्ति, न मठेषु । मठमन्दिरे उमे लोकानां चारित्रिकविकसाय प्रतिष्ठिते । तत्राचार्या महापण्डिताश्व नियोजिताः।
4. ख्रीष्टस्याष्टमे शतके श्वेताम्बराणां दिगम्बराणाञ्च चैत्यवासः सम्प्रवर्तितो दृश्यते । परम्परावादिनो मुनयश्चैत्यवासस्य विरोधका आसन् तत्र शिथिलाचरस्य सम्भावनायाः कारणात् ।
5. अथर्ववेद **15.6.11-12; 11.7.28;** शतपथे **11.5.6.81**
6. शतपथानुसारं देवजनविद्या, मायावेदः, इतिहास, पुराणानि च